श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ नवमस्कन्धे दशमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ नवमस्कन्धे दशमोऽध्यायः ॥

श्रीशुक उवाच
खट्वाङ्गाद् दीर्घबाहुश्च रघुस्तस्मात् पृथुश्रवाः।
अजस्ततो महाराजस्तस्माद् दशरथोऽभवत् ॥ 1 ॥

तस्यापि भगवानेष साक्षाद् ब्रह्ममयो हरिः।
अंशांशेन चतुर्धागात् पुत्रत्वं प्रार्थितः सुरैः।
रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञया ॥ 2 ॥

तस्यानुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः।
श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः ॥ 3 ॥

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं
    पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो
    यो हरीन्द्रानुजाभ्याम्।
वैरूप्याच्छूर्पणख्याः प्रियविरहरुषा -
    ऽऽरोपितभ्रूविजृम्भ -
त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः
    कोसलेन्द्रोऽवतान्नः ॥ 4 ॥

विश्वामित्राध्वरे येन मारीचाद्या निशाचराः।
पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुङ्गवाः॥ 5 ॥

यो लोकवीरसमितौ धनुरैशमुग्रं
सीतास्वयंवरगृहे त्रिशतोपनीतम्।
आदाय बालगजलील इवेक्षुयष्टिं
सज्जीकृतं नृप विकृष्य बभञ्ज मध्ये॥ 6 ॥

जित्वानुरूपगुणशीलवयोऽङ्गरूपां
सीताभिधां श्रियमुरस्यभिलब्धमानाम्।
मार्गे व्रजन् भृगुपतेर्व्यनयत् प्ररूढं
दर्पं महीमकृत यस्त्रिरराजबीजाम्॥ 7 ॥

यः सत्यपाशपरिवीतपितुर्निदेशं
स्त्रैणस्य चापि शिरसा जगृहे सभार्यः।
राज्यं श्रियं प्रणयिनः सुहृदो निवासं
त्यक्त्वा ययौ वनमसूनिव मुक्तसङ्गः॥ 8 ॥

रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धे -
स्तस्याः खरत्रिशिरदूषणमुख्यबन्धून्।
जघ्ने चतुर्दशसहस्रमपारणीय -
कोदण्डपाणिरटमान उवास कृच्छ्रम्॥ 9 ॥

सीताकथाश्रवणदीपितहृच्छयेन
सृष्टं विलोक्य नृपते दशकन्धरेण।
जघ्नेऽद्भुतैणवपुषाऽऽश्रमतोऽपकृष्टो
मारीचमाशु विशिखेन यथा कमुग्रः॥ 10 ॥

रक्षोऽधमेन वृकवद् विपिनेऽसमक्षं
वैदेहराजदुहितर्यपयापितायाम्।

भ्रात्रा वने कृपणवत् प्रियया वियुक्तः
    स्त्रीसङ्गिनां गतिमिति प्रथयंश्चचार ॥ **11** ॥

दग्ध्वाऽऽत्मकृत्यहतकृत्यमहन् कबन्धं
    सख्यं विधाय कपिभिर्दयितागतिं तैः।
बुद्ध्वाथ बालिनि हते प्लवगेन्द्रसैन्यै -
    र्वेलामगात् स मनुजोऽजभवार्चिताङ्घ्रिः ॥ **12** ॥

यद्रोषविभ्रमविवृत्तकटाक्षपात -
    सम्भ्रान्तनक्रमकरो भयगीर्णघोषः।
सिन्धुः शिरस्यर्हणं परिगृह्य रूपी
    पादारविन्दमुपगम्य बभाष एतत् ॥ **13** ॥

न त्वां वयं जडधियो नु विदाम भूमन्
    कूटस्थमादिपुरुषं जगतामधीशम्।
यत्सत्त्वतः सुरगणा रजसः प्रजेशा
    मन्योश्च भूतपतयः स भवान् गुणेशः ॥ **14** ॥

कामं प्रयाहि जहि विश्रवसोऽवमेहं
    त्रैलोक्यरावणमवाप्नुहि वीर पत्नीम्।
बध्नीहि सेतुमिह ते यशसो वितत्यै
    गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥ **15** ॥

बद्ध्वोदधौ रघुपतिर्विविधाद्रिकूटैः
    सेतुं कपीन्द्रकरकम्पितभूरुहाङ्गैः।
सुग्रीवनीलहनुमत्प्रमुखैरनीकै -
    र्लङ्कां विभीषणदृशाऽऽविशदग्रदग्धाम् ॥ **16** ॥

सा वानरेन्द्रबलरुद्धविहारकोष्ठ -
    श्रीद्वारगोपुरसदोवलभीविटङ्का।

निर्भज्यमानधिषणध्वजहेमकुम्भ -
    शृङ्गाटका गजकुलैर्ह्रदिनीव घूर्णा ॥ **17** ॥

रक्षःपतिस्तदवलोक्य निकुम्भकुम्भ -
    धूम्राक्षदुर्मुखसुरान्तनरान्तकादीन्।
पुत्रं प्रहस्तमतिकायविकम्पनादीन्
    सर्वानुगान् समहिनोदथ कुम्भकर्णम् ॥ **18** ॥

तां यातुधानपृतनामसिशूलचाप -
    प्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गाम्।
सुग्रीवलक्ष्मणमरुत्सुतगन्धमाद -
    नीलाङ्गदर्क्षपनसादिभिरन्वितोऽगात् ॥ **19** ॥

तेऽनीकपा रघुपतेरभिपत्य सर्वे
    द्वन्द्वं वरूथमिभपत्तिरथाश्वयोधैः।
जघ्नुर्द्रुमैर्गिरिगदेषुभिरङ्गदाद्याः
    सीताभिमर्शहतमङ्गलरावणेशान् ॥ **20** ॥

रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट
    आरुह्य यानकमथाभिससार रामम्।
स्वःस्यन्दने द्युमति मातलिनोपनीते
    विभ्राजमानमहनन्निशितैः क्षुरप्रैः ॥ **21** ॥

रामस्तमाह पुरुषादपुरीष यन्नः
    कान्तासमक्षमसतापहृता श्ववत् ते।
त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य
    यच्छामि काल इव कर्तुरलङ्घ्यवीर्यः ॥ **22** ॥

एवं क्षिपन् धनुषि सन्धितमुत्ससर्ज
    बाणं स वज्रमिव तद्धृदयं बिभेद।

सोऽसृग् वमन् दशमुखैर्न्यपतद् विमाना -
द्धाहेति जल्पति जने सुकृतीव रिक्तः ॥ **23** ॥

ततो निष्क्रम्य लङ्काया यातुधान्यः सहस्रशः।
मन्दोदर्या समं तस्मिन् प्ररुदत्य उपाद्रवन् ॥ **24** ॥

स्वान् स्वान् बन्धून् परिष्वज्य लक्ष्मणेषुभिरर्दितान्।
रुरुदुः सुस्वरं दीना घ्नन्त्य आत्मानमात्मना ॥ **25** ॥

हा हताः स्म वयं नाथ लोकरावण रावण।
कं यायाच्छरणं लङ्का त्वद्विहीना परार्दिता ॥ **26** ॥

नैवं वेद महाभाग भवान् कामवशं गतः।
तेजोऽनुभावं सीताया येन नीतो दशामिमाम् ॥ **27** ॥

कृतैषा विधवा लङ्का वयं च कुलनन्दन।
देहः कृतोऽन्नं गृध्राणामात्मा नरकहेतवे ॥ **28** ॥

श्रीशुक उवाच
स्वानां विभीषणश्चक्रे कोसलेन्द्रानुमोदितः।
पितृमेधविधानेन यदुक्तं साम्परायिकम् ॥ **29** ॥

ततो ददर्श भगवानशोकवनिकाश्रमे।
क्षामां स्वविरहव्याधिं शिंशपामूलमास्थिताम् ॥ **30** ॥

रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकम्पत।
आत्मसन्दर्शनाह्लादविकसन्मुखपङ्कजाम् ॥ **31** ॥

आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः।
विभीषणाय भगवान् दत्त्वा रक्षोगणेशताम् ॥ **32** ॥

लङ्कामायुश्च कल्पान्तं ययौ चीर्णव्रतः पुरीम्।
अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि॥ **33** ॥

उपगीयमानचरितः शतधृत्यादिभिर्मुदा।
गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलाम्बरम्॥ **34** ॥

महाकारुणिकोऽतप्यज्जटिलं स्थण्डिलेशयम्।
भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः॥ **35** ॥

पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजम्।
नन्दिग्रामात् स्वशिबिराद् गीतवादित्रनिःस्वनैः॥ **36** ॥

ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः।
स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजै रथैः॥ **37** ॥

सदश्वै रुक्मसन्नाहैर्भटैः पुरटवर्मभिः।
श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः॥ **38** ॥

पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च।
पादयोर्न्यपतत् प्रेम्णा प्रक्लिन्नहृदयेक्षणः॥ **39** ॥

पादुके न्यस्य पुरतः प्राञ्जलिर्बाष्पलोचनः।
तमाश्लिष्य चिरं दोर्भ्यां स्नापयन् नेत्रजैर्जलैः॥ **40** ॥

रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः।
तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः॥ **41** ॥

धुन्वन्त उत्तरासङ्गान् पतिं वीक्ष्य चिरागतम्।
उत्तराः कोसला माल्यैः किरन्तो ननृतुर्मुदा॥ **42** ॥

पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे।
विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः॥ **43** ॥

धनुर्निषङ्गाञ्छत्रुघ्नः सीता तीर्थकमण्डलुम्।
अबिभ्रदङ्गदः खड्गं हैमं चर्मर्क्षराण् नृप॥ **44**॥

पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च वन्दिभिः।
विरेजे भगवान् राजन् ग्रहैश्चन्द्र इवोदितः॥ **45**॥

भ्रातृभिर्नन्दितः सोऽपि सोत्सवां प्राविशत् पुरीम्।
प्रविश्य राजभवनं गुरुपत्नीः स्वमातरम्॥ **46**॥

गुरून् वयस्यावरजान् पूजितः प्रत्यपूजयत्।
वैदेही लक्ष्मणश्चैव यथावत् समुपेयतुः॥ **47**॥

पुत्रान् स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिताः।
आरोप्याङ्केऽभिषिञ्चन्त्यो बाष्पौघैर्विजहुः शुचः॥ **48**॥

जटा निर्मुच्य विधिवत् कुलवृद्धैः समं गुरुः।
अभ्यषिञ्चद् यथैवेन्द्रं चतुःसिन्धुजलादिभिः॥ **49**॥

एवं कृतशिरःस्नानः सुवासाः स्रग्व्यलङ्कृतः।
स्वलङ्कृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ॥ **50**॥

अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः।
प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः।
जुगोप पितृवद् रामो मेनिरे पितरं च तम्॥ **51**॥

त्रेतायां वर्तमानायां कालः कृतसमोऽभवत्।
रामे राजनि धर्मज्ञे सर्वभूतसुखावहे॥ **52**॥

वनानि नद्यो गिरयो वर्षाणि द्वीपसिन्धवः।
सर्वे कामदुघा आसन् प्रजानां भरतर्षभ॥ **53**॥

नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः।
मृत्युश्चानिच्छतां नासीद् रामे राजन्यधोक्षजे॥ **54**॥

एकपत्नीव्रतधरो राजर्षिचरितः शुचिः।
स्वधर्मं गृहमेधीयं शिक्षयन् स्वयमाचरत्॥ **55**॥

प्रेम्णानुवृत्त्या शीलेन प्रश्रयावनता सती।
भिया ह्रिया च भावज्ञा भर्तुः सीताहरन्मनः॥ **56**॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
नवमस्कन्धे रामचरिते दशमोऽध्यायः॥